## प्रस्तावना:

अस्मिन् वैज्ञानिकयुगे सर्वेषु देशेषु सर्वासु भाषासु च नूतन-नूतनाः विविधाः आविष्काराः भवन्ति। एतद्नुसृत्यैव प्राचीनतमायां भाषायां संस्कृतेऽपि विविधरूपेण संशोधनं सम्प्रति दरीदृश्यते। यतोहि अस्माकं भारतीय संस्कृतेः मूलाधारः वेदः अस्ति। वेदादेव अन्यत्सर्वम् यत्र-तत्र शास्त्रेषु च विविधानि अनुसंधेय तत्त्वानि प्राप्यन्ते।

संस्कृतवाङ्गमयं अतीवविपुलं वर्तते। अस्मिन् वाङ्गमये अनेकानि रत्नानि लोकेपकारकाणि निदर्शनानि प्राप्यन्ते। अस्य संस्कृतवाङ्गमयस्य आरम्भः वेदतः भवति। वेदोत्तरकाले अनेकानि शास्त्राणि पुराणानि च सन्ति। वेदस्य उपब्रह्मणम् पुराणेषु उपलभ्यते--

**इतिहास पुराणाभ्यां वेदं समुपबृंहयेत्।**
**विभत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति।।**[1]

एतेन ज्ञायते वेदवर्णितविषयाणां उपब्रह्मणानाम् पुराणेषु अस्ति। पुराणां वैशिष्ट्यं महत्वम् च लोके प्रचारः प्रसारश्च प्रायेण अधिकमस्ति। अनेन कारणेन पुराणेषु वर्णित-विषयाणां महत्त्वं उपयोगः प्रचारश्च अद्यापि ग्रामे-ग्रामे, जने-जने व्यापृताः सन्ति। एतदनुभूयैव मया चिन्तितं यत् --

---

1. महाभारत 1/268

“**पुराणेषु ज्यौतिषकर्मकाण्डयोः विमर्शः** करणीयः यतोहि ज्योतिषशास्त्रस्य कर्मकाण्डस्य च लोके अवस्थितिः महनीयाः अस्ति। वस्तुस्तु ज्यौतिषस्य स्वातन्त्र्यरूपेण अनुसंधानकार्यम् विविधेषु विश्वविद्यालयेषु विविधरूपेषु च जातम् तद्वदेव कर्मकाण्डस्य यस्य नाम पौरोहित्यम् वर्तते। तस्यापि महत्त्वम् क्रिया स्वरूपं च समाजे विद्यते। अस्मिन् विषयेऽपि विविधरूपेण शोधकार्यणि जातम्, किन्तु ज्यौतिषकर्मकाण्डयोः पुराणेषु किम् स्वरूपं, किम् महत्वम्, का च तस्योपगिता इत्यादीनाम् विषयाणां एकत्ररूपेण अनुसंधानकार्यम् अद्यावधि नैव जातम् चेत् तन्न्यूनं अस्ति। अनेन कारणेन् अस्य विषयस्य महत्वम् दृष्ट्वा अनुसंधानाय अहम् उत्सहे।

“**पुराणेषु ज्यौतिषकर्मकाण्डयोः विमर्शः**” इति विषयः अस्ति मम् शोधस्य। अत्र ज्यौतिषशास्त्रस्य पौरोहित्यस्य च वैदिकसाहित्ये किम् स्वरूपं अस्ति तद् विषये अध्ययनमस्ति। ततः वेदोत्तरकाले ब्राह्मणं संहितादिग्रन्थेषु ज्यौतिषतत्त्वानां कीदृशं स्वरूपं अस्ति इत्यस्य निरूपणं अस्ति। वेदादि साहित्यस्य उपरान्ते रामायण- महाभारतयोः अपि ज्यौतिषस्य स्वरूपादीनाम् विवेचनम् प्राप्यते। अस्यापि यथाक्रमं चर्चा विद्यते।

**वैदिकवाङ्मयम्  :---**

चतुर्वेदानां स्वरूपवर्णनम् समासेन विविच्य ब्राह्मणाारण्यकानि उपनिषदादीनाम् संक्षिप्तवर्णनं कृत्वा महाभारतपुराणानां परिचयः तत्र ज्यौतिषशास्त्रदृष्ट्याः विमर्शः विद्यते।

**कर्मकाण्ड विषयः ---**

अस्माकं भारतीयसंस्कृते मूलाधारः देवादिपूजनम् तद्पूजनमेव पौहोरित्यस्य मूलविषयः वर्तते। अस्य विषयस्य वैदिकसाहित्ये किम् स्वरूपं ब्रह्मणादिग्रन्थेषु यज्ञ-यज्ञादि रूपेण किम् वैशिष्ट्यम् सूत्र ग्रन्थेषु कर्मकाण्डस्य किम् विवेचनम्, पुराणेषु च कर्मकाण्डविषये का अवधारणा, किम् च तत् स्वरूपं इत्यादिकम् सर्वम् विहितं वर्तते।

महापुराणे ज्यौतिषशास्त्रस्य तत्त्वानां कीदृशं वर्णनम् कियत् च महत्वम् ज्योतिषस्य कानि च तत्त्वानि इति सर्वम् आहत्य कर्मकाण्डीयोपायाः के सन्ति, नक्षत्रशान्त्यादिनाम् किम् विधानं वर्तते इति प्रामाणिकं निरूपणम् विहितमस्ति।

पुराणानां संख्याः अनेकाः सन्ति। यथा अष्टादश महापुराणानि, अष्टादश उपपुराणानि, अष्टादश औपपुराणनि च सन्ति। किन्तु अस्मिन् शोधकार्ये अष्टादश प्रधानमहापुराणानां आधारः स्वीकृतः वर्तते।

अत्र पुराणेषु कर्मकाण्डीयप्रयोगाः कीदृशाः सन्ति, कुत्र च सन्ति, अपि च ज्यौतिषस्यादपि किम् वैशिष्ट्यम् अस्ति इत्यस्य अत्र विवेचनम् विहितमस्ति। अनेन सह और्ध्वदैहिक-क्रियायाम् कर्मकाण्डस्य किम् स्वरूपं यज्ञादिषु ज्यौतिषस्य कावश्यकता पौरोहित्यस्य के-के प्रयोगाः प्रदर्शिताः सन्ति इत्यादिविषयाणां अध्ययनमस्ति।

एतयोः विषयोः सम्यक् समीक्षाऽपि संश्लिष्टा अस्ति। पुराणेषु उभयोः वैशिष्ट्यम् इति उद्घटितम्।

उक्तविषयाणां वर्णनम् शोध-प्रबन्धे पञ्चषु अध्यायेषु विभक्तमस्ति अस्य अध्यायानुसारेण विषयविवेचनम् क्रियते।

प्रायेण अस्य विषयस्य यथानिर्देशं स्पष्टीकरणं कर्तुं प्रयासः सोदाहरणं कृतः। विषयेऽस्मिन् अनेकेषाम् विदुषां सौहृदानां च सहयोगमपि मया स्थले-स्थले समये-समये च स्वीकृतः। अस्मिन् शोधकार्ये प्राच्यप्रतीच्योभयथा रूपेण पुस्तकानाम् विदुषां च मार्गदर्शनं समये-समये प्राप्तम्। अनेन कारणसेन अस्य प्रति कार्तग्यं आवश्यकम्।

**कृतज्ञताप्रकाशनम् :---**

प्रथमे हि मम पितरौ ( श्री दिनेशभाई रावल श्रीमती प्रमिलाबेन) तयोः चरणकमलयोः कृपाप्रसादादेव एतत्कार्यम् पूर्णताङ्गत्वम्।

कार्येऽस्मिन् भार्याभारविमोचनी उक्त्याधारेण मदीया धर्मपत्नी (श्रीमती तन्वीबेन रावल) माम् गृहकार्य भारं विमुच्य कार्यकर्तुम् स्वातन्त्र्यम् दत्तवती एतदर्थम् साऽपि साधुवार्दाहा।

मम् पुत्र्या अपि सहयोगं आसीदति एतस्यैकृतेऽपि शुभकामनास्ति।

काशीविश्वनाथसमूहस्य यानि मम् मित्राणि सन्ति-- प्रयागभाईः, जिगरभाईः, कल्पेशभाई, मेहुलभाई, अनिलभाई, मनीषभाई, अल्पेशभाई इत्यादयः धन्यवार्दाहाः सन्ति।

मम् शोधनिर्देश्काः प्राच्य-पतीच्योभयविद्यानिष्णाताः डॉ. हरिप्रसादपाण्डेयमहाभागाः (भूतपूर्वाचार्य-अध्यक्षश्च, वट़ोदरसंस्कृतमहाविद्यालयः, महाराजासयाजीरावविश्वविद्यालयः) सन्ति। एतेषां महाभागानां कृपादृष्ट्यैव एतत्कार्यम् जातम् तदर्थं केवलं तेषां चरणकमलयोः सादरं प्राणामाञ्जलयः सर्मप्यन्ते।

कार्येऽस्मिन् समये-समये यत्सहाय्यं यैः प्रदत्तं तेषां डॉ.रामपालशुक्लमहाभागानां अध्यक्षः पारम्परिकाध्ययनविभागः, वटोदरसंस्कृतमहाविद्यालयः, महाराजासयाजीराववविश्वविद्यालयः) अपि कार्तग्यं स्मरामि।

शोधप्रबन्धस्य लिपिटंकणसंशोधनादियत्कार्यम् भूतं तदर्थं डॉ. राजदेवमिश्रमहाभागानां सौहार्दं सहयोगं च पौनःपुन्येन स्मारम्यहम्।

पर्यन्ते विद्वद्भ्यः प्रार्थयते यत् प्रबन्धेऽस्मिन् टंकणादिकार्येषु याः त्रुटयः भवेयुः ताः भवदिभिः क्षन्तव्याः। इति शम् --

**शोधार्थी**

धर्मेश रावलः